# श्रीगणेशावतारस्तोत्रम्

{॥ श्रीगणेशावतारस्तोत्रम् ॥}

श्री गणेशाय नमः ।

आङ्गिरस उवाच ।

अनन्ता अवताराश्च गणेशस्य महात्मनः ।

न शक्यते कथां वक्तुं मया वर्षशतैरपि ॥ १॥

संक्षेपेण प्रवक्ष्यामि मुख्यानां मुख्यतां गतान् ।

अवतारांश्च तस्याष्टौ विख्यातान् ब्रह्मधारकान् ॥ २॥

वक्रतुण्डावतारश्च देहिनां ब्रह्मधारकः ।

मत्सरासुरहन्ता स सिंहवाहनगः स्मृतः ॥ ३॥

एकदन्तावतारो वै देहिनां ब्रह्मधारकः ।

मदासुरस्य हन्ता स आखुवाहनगः स्मृतः ॥ ४॥

महोदर इति ख्यातो ज्ञानब्रह्मप्रकाशकः ।

मोहासुरस्य शत्रुर्वै आखुवाहनगः स्मृतः ॥ ५॥

गजाननः स विज्ञेयः सांख्येभ्यः सिद्धिदायकः ।

लोभासुरप्रहर्ता च मूषकगः प्रकीर्तितः ॥ ६॥

लम्बोदरावतारो वै क्रोधसुरनिबर्हणः ।

आखुगः शक्तिब्रह्मा सन् तस्य धारक उच्यते ॥ ७॥

विकटो नाम विख्यातः कामासुरप्रदाहकः ।

मयूरवाहनश्चायं सौरमात्मधरः स्मृतः ॥ ८॥

विघ्नराजावतारश्च शेषवाहन उच्यते ।

ममासुरप्रहन्ता स विष्णुब्रह्मेति वाचकः ॥ ९॥

धूम्रवर्णावतारश्चाभिमानासुरनाशकः ।

आखुवाहनतां प्राप्तः शिवात्मकः स उच्यते ॥ १०॥

एतेऽष्टौ ते मया प्रोक्ता गणेशांशा विनायकाः ।

एषां भजनमात्रेण स्वस्वब्रह्मप्रधारकाः ॥ ११॥

स्वानन्दवासकारी स गणेशानः प्रकथ्यते ।

स्वानन्दे योगिभिर्दृष्टो ब्रह्मणि नात्र संशयः ॥ १२॥

तस्यावताररूपाश्चाष्टौ विघ्नहरणाः स्मृताः ।

स्वानन्दभजनेनैव लीलास्तत्र भवन्ति हि ॥ १३॥

माया तत्र स्वयं लीना भविष्यति सुपुत्रक ।

संयोगे मौनभावश्च समाधिः प्राप्यते जनैः ॥ १४॥

अयोगे गणराजस्य भजने नैव सिद्ध्यति ।

मायाभेदमयं ब्रह्म निवृत्तिः प्राप्यते परा ॥ १५॥

योगात्मकगणेशानो ब्रह्मणस्पतिवाचकः ।

तत्र शान्तिः समाख्याता योगरूपा जनैः कृता ॥ १६॥

नानाशान्तिप्रभेदश्च स्थाने स्थाने प्रकथ्यते ।

शान्तीनां शान्तिरूपा सा योगशान्तिः प्रकीर्तिता ॥ १७॥

योगस्य योगता दृष्टा सर्वब्रह्म सुपुत्रक ।

न योगात्परमं ब्रह्म ब्रह्मभूतेन लभ्यते ॥ १८॥

एतदेव परं गुह्यं कथितं वत्स तेऽलिखम् ।

भज त्वं सर्वभावेन गणेशं ब्रह्मनायकम् ॥ १९॥

पुत्रपौत्रादिप्रदं स्तोत्रमिदं शोकविनाशनम् ।

धनधान्यसमृद्ध्यादिप्रदं भावि न संशयः ॥ २०॥

धर्मार्थकाममोक्षाणां साधनं ब्रह्मदायकम् ।

भक्तिदृढकरं चैव भविष्यति न संशयः ॥ २१॥

इति मुद्गलपुराणान्तर्गतं गणेशावतारस्तोत्रं सम्पूर्णम् ॥

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)

and Amith K Nagaraj (amithkn@rediffmail.com)

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Ganesha Avatara Stotram Lyrics in Devanagari PDF
% File name : gaNeshAvatArastotram.itx
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj)
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : mudgalapurANe
% Latest update : September 15, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.

PDF file is generated [ October 12, 2015 ] at Stotram Website